मनोगतम् [०२.३०]- ८३-उपाख्यानम् 'मनकीबात', प्रसा.तिथिः - २८- नवेम्बर'२०२१

[भाषान्तरम् - सर्वश्री-श्रुतिकान्तपाण्डेय-गवीशद्विवेदिभ्यां सम्भूय बलदेवानन्द-सागर-द्वारा]

मम प्रियाः देशवासिनः, नमस्कारः | अद्य वयं पुनः एकवारं 'मनकीबात'-कार्यक्रमार्थं संयुताः भवामः | दिवस-द्वयानन्तरं डिसेम्बर-मासः अपि आरभते, अथ च, डिसेम्बर-मासागमनानुपदमेव मनोवैज्ञानिक-दृष्ट्या वयम् एतादृशमेव अनुभवामः यत्, भवतु, वर्षं पूर्णतां याति | अयन्तु वर्षस्य अन्तिमः मासः, तथा च, नूतन-वर्षार्थं अनेकविधानि कार्याणि प्रकल्पयितुम् आरभामहे | अस्मिन्नेव मासे नौसेना-दिवसः, सशस्त्र-सेनाध्वज-दिवसः चापि देशेन आमान्यते | वयं सर्वे जानीमहे यत् देशोऽयं डिसेम्बर-मासे षोडशे दिनाङ्के विगत-शताब्दे एकसप्ततितम-वर्षे सञ्जात-युद्धस्य स्वर्णिम-जयन्ती-वर्षमपि परिपालयति | एतेषु सर्वेष्वपि अवसरेषु अहं देशस्य सुरक्षा- बलानि स्मरामि, अस्मदीयान् वीरान् स्मरामि | विशेषरूपेण, एतादृशानां वीराणां जन्म-दात्रीणां वीरमातॄणां स्मरणं करोमि | यथापूर्वम् अस्मिन् क्रमेऽपि NamoApp-MyGov- चेत्यत्र भवतां सर्वेषां बहुविधान् परामर्शान् अहम् अवाप्नवम् | स्वीय-कुटुम्बस्य अङ्गमिव मां परिभावयन्तः भवन्तः निज-जीवनस्य सुखानि दुःखानि चापि सम्विभाजितवन्तः | एतेषु अनेके युवानः अपि सन्ति, विद्यार्थिनः विद्यार्थिन्यः च सन्ति | वस्तुतस्तु मह्यमिदम् अतितरां रोचते यत् 'मनकीबात'-प्रसारणस्य अयम् अस्मदीयः परिवारः अनारतम् एधतेतरामेव, मनसा अपि संयुतो भवति, तथा च मन्तव्येनापि संयुक्तो जायते | अस्माकं दृढीभूयमानाः इमे सम्बन्धाः, अस्मासु, निरन्तरं सकारात्मकतां प्रवहन्ति |

मम प्रियाः देशवासिनः, सीतापुरस्य ओजस्विना मह्यं लिखितमस्ति यत् अमृतमहोत्सवसम्बद्धाः चर्चाः तस्मै बहु रोचन्ते। असौ स्वीयमित्रैः साकं 'मन-की-बात-प्रसारणं' शृणोति, स्वातन्त्र्यसंग्रामविषये च विस्तरेण ज्ञातुं सततं प्रयासमाचरति।

सखायः, अमृतमहोत्सवः ज्ञानार्जनेन सहैव अस्मभ्यं देशाय किमपि कर्तुमपि प्रेरयति। साम्प्रतं देशस्य सामान्यजनैः साकं संसद्, प्रशासनानि, पंचायताश्च अमृतमहोत्सवेन गुंजन्ति। एतन्महोत्सव-सम्बद्धानां कार्यक्रमाणां क्रमः सततं प्रचलति। एतादृशः एव रोचक-कार्यक्रमः विगतदिवसेषु देहल्यामायोजितम्। 'आज़ादीकीकहानी - बच्चों की ज़ुबानी' इत्याख्ये कार्यक्रमे बालैः स्वाधीनतासंग्रामसम्बद्धाः कथाः पूर्णमनोभावेन प्रस्तुताः। भारतेन साकं नेपाल-मॉरीशस-तन्जानिया-न्यूज़ीलैण्ड-फीजी-देशानां विद्यार्थिनां सहभागः अस्य कार्यक्रमस्य वैशिष्ट्यमवर्तत। देशस्य महारत्नसमवायः ओ.एन्.जी.सी. अपि भिन्नरीत्या अमृतमहोत्सवमायोजयति। ओ.एन्.जी.सी. अद्यत्वे स्वीयतैलक्षेत्रेषु विद्यार्थिनां कृते अध्ययन-पर्यटनस्यायोजनं विदधाति। एतेष्ववसरेषु युवजनेभ्यः ओ.एन्.जी.सी-समवायस्य तैलक्षेत्रीय-कार्याणां विवरणं प्रदीयते। येनास्माकं उदीयमानाः अभियान्त्रिकाः राष्ट्रनिर्माणप्रयासेषु पूर्णोत्साहेन सहभागिनः भवन्तु।

सखायः, स्वातन्त्र्याभियाने जनजातीयसमुदायानां योगदानमालक्ष्य देशेन जनजातीय-गौरव-सप्ताहः अपि आयोजितः। देशस्य भिन्नक्षेत्रेषु एतत्सम्बद्धाः कार्यक्रमाः आयोजिताः। अंडमान-नीकोबार-द्वीपसमूहे जारवा-ओंगे-सदृशानां जनजातीयसमूहानां सदस्यैः स्वीयसंस्कृतेः जीवत्-प्रदर्शनं विहितम्। एतादृशं विस्मयकरमेकं कार्यं हिमाचलप्रदेशस्य ऊनायाः मिनिएचर-लेखकेन रामकुमारजोशिना सम्पादितम्। तेन पोस्टेज्-स्टैम्पेति पत्रालयमुद्रासु नेताजीसुभाषचन्द्रबोस-पूर्वप्रधानमंत्रि-लालबहादुर- शास्त्रिमहाभागयोः अद्भुतचित्राणि विरचितानि। रामेति हिन्दीशब्दोपरि एतयोः चित्राणि कृत्वा महापुरुषद्वयस्य संक्षिप्तजीवनचरितेऽपि लिखिते स्तः। मध्यप्रदेशस्य कटनी-तोऽपि कतिपयमित्रैः अविस्मरणीयस्य कथाश्रवणकार्यक्रमस्य सूचना प्रेषितास्ति। यस्मिन् राणीदुर्गावतीमहाभागायाः अदम्यसाहसोत्सर्गस्य स्मृतयः पुनः आकारीकृताः। एतादृशः एवैकः कार्यक्रमः काशीनगर्यामपि आयोजितः। गोस्वामीतुलसीदास-संतकबीर-संतरैदास-भारतेन्दुहरिश्चन्द्र-मुंशीप्रेमचन्द-जयशंकर-प्रसादसदृशानां विभूतीनां सम्माने त्रिदिवसात्मको महोत्सवः आयोजितः। विविधकालखण्डेषु एतेषां सर्वेषां देशस्य जनजागृतौ महती भूमिका

अवर्तत। भवता स्मृतं भवेद्यत् 'मन-की-बात'-प्रसारणस्य विगतप्रकरणेषु मया स्पर्धात्रयस्य उल्लेखः विहितः। एतासु देशभक्तिगीतलेखनं, स्वातन्त्र्यसंघर्षकथानां रंगोलिका-करणम्, अपि च, बालहृदयेषु भव्यभारतस्य स्वप्नयोजकानां बालगीतानां संयोजनं चाऽवर्तन्त। अहम् आशान्वितोऽस्मि यदेतासां स्पर्धानां कृते भवद्भिः स्वीय-प्रविष्टयः प्रेषिताः भवेयुः। एतासां कृते भवतां योजनाः सन्नद्धाः भवेयुः | मित्रैः साकं चर्चाः चापि विहिताः भवेयुः। अहं आशान्वितोऽस्मि यद्भारतस्य प्रतिकोणं भवन्तः एतत्कार्यक्रमम् अवश्यं विस्तारयिष्यन्ति।

मम प्रियाः देशवासिनः, एतच्चर्चाऽनन्तरमहं भवतः साक्षात् वृन्दावनं नयामि। वृन्दावनविषये कथ्यते यदेतत् भगवत्प्रेमभावस्य प्रत्यक्षस्वरूपं वर्तते। अस्माकं सन्त-जनैरपि कथितमस्ति - यह आसा धरि चित में, यह आसा धरि चित में,

कहत जथा मति मोर। वृन्दावन सुख रंग कौ, वृन्दावन सुख रंग कौ,काहु न पायौ और।

अर्थात्, वृन्दावनस्य महिमानं वयं सर्वे स्वीयसामर्थ्यानुसारं अवश्यं कथयामः।परं वृन्दावनस्य यत्सुखमस्ति, अत्रत्यं यद्रसं भवति; तस्य पारं कोप्यधिगन्तुं न शक्नोति। तत्तु असीमं वर्तते। तदैव वृन्दावनं अखिलजगतः जनान् आत्मानं प्रति आकर्षयति। अस्याभासं तु भवन्तः विश्वस्य प्रत्येकं भागे कर्तुमर्हन्ति।

पश्चिमास्ट्रेलियादेशे पर्थनामकं नगरमस्ति । क्रिकेट्-अनुरागिणः एतेन सुपरिचिताः स्युः यतो हि पर्थनगरे क्रिकेटस्पर्धाः बहुशः आयोज्यन्ते। पर्थनगरे 'सेक्रेड-इण्डिया-गैलरी' इत्याख्या एका कलावीथिः वर्तते। एषा वीथिः स्वान्-वैली-इत्याख्ये मनोहरक्षेत्रे स्थापितास्ति। एषा आस्ट्रेलियावासिन्याः जगत्-तारिणी-दासीमहाभागायाः प्रयासैः उपपादितास्ति। जगत्-तारिणी आस्ट्रेलियावासिनी अस्ति। तत्रैव जाता, पालिता च। परं त्रयोदशवर्षाधिकं यावदसौ वृन्दावने वासं करोति स्म । तया कथ्यते यत् स्वदेशं प्रत्यावर्तिता सत्यप्यसौ वृन्दावनं कदापि नैव विस्मृतवती- इति कृत्वाऽसौ वृन्दावनेन तत्रत्याध्यात्मिकभावेन आत्मानं भावयितुं आस्ट्रेलियादेशे एव वृन्दावनं स्थापितवती। स्वीयकलामाध्यमेन तत्रैकमद्भुतं वृन्दावनं तया निर्मितम् । अत्रागन्तुकाः भारतस्य सर्वाधिकप्रसिद्धानां तीर्थस्थलानां वृन्दावन-नवद्वीप-जगन्नाथपुरीत्यादीनां परम्परां संस्कृतिं च द्रष्टुं शक्नुवन्ति। अत्र भगवतः कृष्णस्य जीवनेनोत्प्रेरिताः कलाकृतयः अपि प्रदर्शिताः। एकस्मिन् मूर्तिशिल्पे भगवता कृष्णेन गोवर्धनपर्वतः अंगुल्या धारितोऽस्ति, यस्मात् अधः वृन्दावनवासिनः आश्रयं कुर्वन्ति। जगत्-तारिण्याः अद्भुतप्रयासः अस्मान् कृष्णभक्त्याः शक्तिं प्रदर्शयति। अहमेतत्-प्रयासार्थं तस्यै बहुशः शुभकामनाः व्याहरामि।

मम प्रियाः देशवासिनः, सद्यैवाहं आस्ट्रेलियादेशे पर्थनगरे निर्मितस्य वृन्दावनस्य विषये अवदम्। अन्यमेकं रोचकवृत्तमस्ति यत् आस्ट्रेलियादेशस्य सम्बन्धः बुन्देलखण्डस्य झांसी-नगरेणापि वर्तते। झांसीराज्ञी लक्ष्मीबाई यदा ईस्ट-इण्डिया-कम्पनीं विरुध्य विधिसंघर्षं विहितवती, तदाऽस्याः विधिज्ञः जॉन-लैन्गः आसीत्। जॉन-लैन्गः मूलतः आस्ट्रेलियावासी आसीत्। भारतेऽसौ राणी-लक्ष्मीबाई-महाभागायाः अधिवक्ता अवर्तत। अस्माकं स्वातन्त्र्यसंघर्षे झांसी-बुन्देलखण्डयोः योगदानं वयं सर्वे सुबहु जानीमः। अत्र राणीलक्ष्मीबाई-झलकारीबाई-सदृशाः वीरांगनाः अवर्तन्त। मेजरध्यानचंदादयः खेलरत्नशोभिताः अपि एतेनैव क्षेत्रेण देशाय समर्पिताः।

सखायः, शौर्यं केवलं युद्धक्षेत्रेष्वेव न प्रदर्श्यते। वीरत्वं यदा व्रतं भवति तदैतस्य विस्तरः भवति, प्रत्येकं च क्षेत्रे नैकेषां कार्याणां सिद्धिः भवति। एतादृशायाः वीरतायाः विषये श्रीमत्या ज्योत्स्नामहाभागया पत्रेण सूचितोऽस्मि। जालौनक्षेत्रे पारम्परिकी 'नून'-इत्याख्या नदी आसीत्। नद्यैषा एतत् क्षेत्रस्य कृषकाणां कृते प्रमुखजलस्रोतोरूपा अवर्तत। शनैश्शनैः नून-नदी लोपप्राया अभवत्। विगतवैभवा नदी अवजलप्रवाहिका नालिका अजायत। येन कृषकाणां समक्षं सेचनसंकटं आपतितम्। जालौननिवासिभिः समाधानस्य संकल्पः साधितः। अस्यैव वर्षस्य मार्चमासे एका समितिः कारिता। सहस्रशः ग्रामीणाः स्थानीयजनाश्च स्वतःस्फूर्तेनाभियानेन सम्बद्धाः जाताः। अत्रत्यैः पंचायतैः ग्रामीणैः सम्भूय कार्यम् आरब्धं येन अत्यल्पसमये न्यूनव्ययेन च नद्यैषा पुनर्जीविता विहिता । बहवः कृषकाः एतेन लाभान्विताः जाताः। युद्धक्षेत्रेभ्यः पृथक्-वीरताभावस्यैतत् उदाहरणम् अस्माकं देशवासिनां संकल्पशक्तिं दर्शयति। असौ सन्देशयति यत् अपि वयं संकल्पं साधयामः तर्हि किमपि असंभवं नास्ति। तदैवाहं कथयामि - 'सबका प्रयास' इति।

मम प्रियाः देशवासिनः, यदा वयं प्रकृतिं संरक्षामः तदा प्रकृतिरपि अस्मान् प्रतिसंरक्षति। एतत्तथ्यं वयं स्वजीवनेऽपि अनुभवामः। एतादृशं दृष्टान्तं तमिलनाडु-वासिभिः व्यापकस्तरे प्रस्तुतमस्ति। एतत् उदाहरणं तमिलनाडोः तूतुकुड़ी-जनपदस्यास्ति। वयं जानीमः यत्तटीयक्षेत्रेषु नैकधा भूप्लावनस्य आशंका भवति। तूतुकुड़ी-क्षेत्रेऽपि नैके क्षुद्रद्वीपाः अवर्तन्त, येषां समुद्रप्लावनस्य भयं वर्धमानम् आसीत्। अत्रत्यजनैः विशेषज्ञैश्च एतस्याः प्राकृतिकापदः समाधानं प्रकृत्यैव साधितम्। एते जनाः द्वीपेषु पल्मोरावृक्षान् आरोपयन्ति। एते वृक्षाः झंझावातेषु चण्डवातेषु च स्थिराः वर्तन्ते, भूमिं च गोपयन्ति। साम्प्रतमेतैः एतत् क्षेत्रस्य रक्षायाः नूतनाश्वासनं व्यवस्थापितम् ।

सखायः, प्रकृत्या अस्मत्कृते संशयः तदैवापतति यदा वयमेतस्याः सन्तोलनं अस्याः पवित्रतां च नाशयामः। प्रकृतिः मातरमिव अस्मान् पालयति, अस्माकं संसारे नूतनवर्णान् च योजयति । सद्यः एव मया सामाजिकमाध्यमेषु दृष्टं यन्मेघालयस्य 'फ्लाइंग-बोट' इत्याख्यं चित्रं बहुप्रसृतं भवति। प्रथमदृष्ट्यैव चित्रमिदं ध्यानमाकर्षयति। भवत्स्वपि अधिसंख्यैः एतच्चित्रं दृष्टं भवेत्। वायौ तरत् इदं नौकायानं यदा ध्यानेन दृश्यते तर्हि आभासः भवति यदैषा नौका तु जले तरति। नद्याः जलं एतावत् स्वच्छमस्ति यदेतस्याः तलं स्पष्टतया दृश्यते, नौका च वायौ तरन्ती इव प्रतीयते। अस्माकं देशे अनेकानि राज्यानि सन्ति, नैकानि क्षेत्राणि च वर्तन्ते, यत्र जनैः स्वीय-प्राकृतिकदायं सम्यक् संधारितमस्ति। एतैः प्रकृत्या सम्भूय निवासस्य जीवनशैली आसाम्प्रतं संरक्षितास्ति। एतदस्माकं कृतेऽपि उत्प्रेरकमस्ति। अस्मान् परितः यानि प्राकृतिकसंसाधनानि सन्ति, तेषां संरक्षणं करणीयम्, यथारूपं च तत् संधारणीयम् । एतस्मिन्नेव एवास्माकं सर्वेषां हितमस्ति, संसारस्य हितमस्ति।

मम प्रियाः देशवासिनः, सर्वकारः यदा योजनाः योजयति, धनव्ययं करोति, समये परियोजनानां समापनं करोति च, तदा जनाः अनुभवन्ति यत्सर्वकारः कार्यं कुर्वन्नस्ति। परं सर्वकारस्य नैकेषु कार्येषु, विकासयोजनासु मानवीयसंवेदनायुताः सन्दर्भाः सर्वदैव विशेषसुखमुपकल्पयन्ति। सर्वकारस्य प्रयासैः योजनाभिश्च यदा जीवनपरिवर्तनं भवति, तस्य परिवर्तितजीवनस्य अनुभवः कीदृशः भवतीति यदा शृणुमः तदा वयमपि संवेदनापूरिताः भवामः। एतेन मनसि सन्तोषः जायते, योजनानां च जनेषु प्रसारणस्य प्रेरणापि भवति। एतादृशी तु स्वान्तः सुखाय भवति, इति कृत्वाद्य 'मन-की-बात' इत्यस्यां चर्चायां एतादृशानि मित्राणि आगच्छन्ति यैः स्वीयसंकल्पशक्त्या नवजीवनमवाप्तमस्ति। एतैः आयुष्मान्-भारत-योजनान्तर्गतं

उपचारः अधिगतः, नूतनजीवनं चारब्धमस्ति। अस्माकं प्रथममित्रमस्ति राजेशकुमारप्रजापतिः यो हि हृदयरोगेण पीडितः अवर्तत।

तर्हि आयान्तु राजेशमहोदयेन सह संवादं कुर्मः -

प्रधानमन्त्रिवर्यः - राजेशमहोदय! नमस्ते।

राजेशप्रजापतिः - नमस्ते श्रीमन्! नमस्ते ।

प्रधानमन्त्रिवर्यः - राजेशमहोदय! भवतः कः रोगः आसीत्? पुनः कञ्चित् चिकित्सकं समीपं भवान् गतः स्यात्, मां किञ्चित् बोधयतु भवान् स्थानीयचिकित्सकेन किमपि उक्तं स्यात्, अनन्तरं भवान् अन्यस्य चिकित्सकस्य समीपं गतः स्यात्? तदनन्तरम् भवान् निर्णयं न कृतवान् स्यात् अथ वा कृतवान्? किं किं जातम्?

राजेशप्रजापतिः - श्रीमन्! मम हृदये समस्या अजायत, मम वक्षःस्थले ज्वलनम् इव भवति स्म। महोदय! तदनन्तरम् अहम् चिकित्सकं मिलितवान्, पूर्वं तु चिकित्सकः उक्तवान्, वत्स! भवतः उदरे अम्लतत्वं भवितुम् अर्हति। तदर्थम् अहं बहूनि दिनानि अम्ल-निमित्तं चिकित्सां कारितवान् । यदा एतया चिकित्सया लाभान्वितः न जातः तदा अहं डॉ. कपूरमहोदयं दर्शितवान्, तदा तेन उक्तं वत्स! यानि एतानि लक्षणानि सन्ति तदनुसारं angiography-इति परीक्षणेन एव ज्ञातुं शक्नोमि, ततः सः मां श्रीराममूर्ति-इत्यत्र प्रेषितवान् | तत्र अहं अमरेश-अग्रवाल-महोदयं मिलितवान्। तेन मम angiography-परीक्षणं कृतम्। अनन्तरं तेन अहं सूचितः यत् वत्स! तव शरीरे तन्त्रिकायाम् अवरोधाः सन्ति। तदा अहं अपृच्छम् महोदय! एतस्मिन् कियान् व्ययः भविष्यति? तदा सः पृष्टवान् आयुष्यमान्-पत्रकम् अस्ति वा यत् प्रधानमन्त्रिणा निर्माप्य दत्तम्। तदा अहम् उक्तवान् मम पार्श्वे अस्ति। तदा तेन मम पत्रकं स्वीकृतम्। अग्रे च मम सम्पूर्णा चिकित्सा तेन एव पत्रकेण जाता। महोदय! भवता यत् एतत् पत्रकं निर्मितम्, तेन अस्मभ्यं निर्धनेभ्यः महत्सौकर्यम् अस्ति | अथ कथम् अहं भवते धन्यवादं करोमि |

प्रधानमन्त्रिवर्यः - भवान् किं करोति राजेशमहोदय!

राजेशप्रजापतिः - महोदय! एतस्मिन् समये अहं वैयक्तिक-संस्थाने वृत्तिं करोमि। श्रीमन्!

प्रधानमन्त्रिवर्यः - भवतः आयुः कियत्?

राजेशप्रजापतिः - अहम् ऊनचत्वारिंशत्वर्षदेशीयः अस्मि श्रीमन्!

प्रधानमन्त्रिवर्यः - एतस्मिन् लघुवयसि भवते हृदयसम्बद्धा समस्या जाता।

राजेशप्रजापतिः - आम् महोदय! किं कथयामि अधुना |

प्रधानमन्त्रिवर्यः - भवतः परिवारे पितृभ्याम् अथवा अन्यसदस्येभ्यः एतादृशी समस्या आसीत् किम्?

राजेशप्रजापतिः - नैव श्रीमन्! कस्मैचित् अपि न आसीत् श्रीमन्! प्रथमतया मया सह एव जातम्।

प्रधानमन्त्रिवर्यः - एतत् आयुष्मान्-पत्रकं भारतप्रशासनेन दीयते। निर्धनेभ्यः एषा महती योजना अस्ति। कथम् एतस्याः विषये ज्ञातम्।

राजेशप्रजापतिः - श्रीमन्! एषा तु, एतावती महती योजना अस्ति। बहवः निर्धनिकाः एतया लाभान्विताः भवन्ति, अथ अत्यन्तं प्रसन्नाः सन्ति महोदय! अस्माभिः तु चिकित्सालये दृष्टम् एतेन पत्रकेण कियन्तः जनाः लाभं प्राप्नुवन्ति। यदा कश्चन चिकित्सकं प्रति कथयति यत् पत्रकं मम पार्श्वे अस्ति। तदा चिकित्सकः तत् पत्रम् आनेतुं सूचयति, तत्-पत्रकाधारेण च चिकित्सां करोति।

प्रधानमन्त्रिवर्यः - अस्तु, यदि एतत् पत्रकं न स्यात्। तर्हि भवता कियान् व्ययः सूचितः आसीत् चिकित्सकेन?

राजेशप्रजापतिः - चिकित्सकमहोदयेन उक्तम् आसीत् पुत्र! यदि आयुष्यमान्-पत्रकं नास्ति तर्हि एतदर्थं व्ययः अत्यधिकः भविष्यति। तदा अहम् उक्तवान् मम सविधे पत्रकम् अस्ति, तदा सः मां झटिति पत्रकं दर्शयितुम् उक्तवान्, अहं च पत्रकं प्रदर्शितवान्। तेन एव पत्रकेण मम सम्पूर्णा चिकित्सा अभवत्। मम एकस्य पणस्य अपि व्ययः न जातः सर्वाः ओषधयः अपि एतेन एव पत्रकेण स्वीकृताः।

प्रधानमन्त्रिवर्यः - तर्हि राजेशमहोदय! अधुना भवति संतोषः अस्ति? स्वास्थ्यं सम्यक् अस्ति?

राजेशप्रजापतिः - आम् श्रीमन्! भवते बहुशः धन्यवादाः श्रीमन्! भवतः आयुः एतावत्  दीर्घं भवतु येन भवान् सर्वदा शासनाधिरूढः भवेत् इति। अथ मम कुटुम्बस्य सर्वेऽपि भवति अतिप्रसन्नाः सन्ति, यत् किं कथयामि भवते?

प्रधानमन्त्रिवर्यः - राजेशमहोदय! भवान् मां शासनाधिरूढतायै शुभकामनाः नैव ददातु, अहम् अद्यापि शासने न अस्मि, नैव च भविष्ये भवितुम् इच्छामि। अहं तु केवलं सेवायां भवितुं कामये। भ्रातः! एतत् पदं, प्रधानमन्त्रित्वम्, एतत् सर्वम् अपि अहं शासनाय नैव, सेवायै कल्पयामि।

राजेशप्रजापतिः  - सेवा एव अपेक्षिता अस्मभ्यं जनेभ्यः अन्यत् किम्?

प्रधानमन्त्रिवर्यः - पश्यन्तु निर्धनिकेभ्यः एषा आयुष्मान्-भारतयोजना स्वयमेव....

राजेशप्रजापतिः -    आम्! श्रीमन्! अत्यन्तम् उत्तमा अस्ति।

प्रधानमन्त्रिवर्यः - परं पश्यतु राजेशमहोदय!  भवान् अस्माकम् एकं कार्यं करोतु, करिष्यति खलु?

राजेशप्रजापतिः - अवश्यम्। करिष्यामि श्रीमन्!

प्रधानमन्त्रिवर्यः  - वस्तुतः किं भवति? जनाः योजनाविषये अनभिज्ञाः भवन्ति। भवान् एकं दायित्वं निभालयतु, एतादृशाः ये निर्धनपरिवारा भवतः समीपे निवसन्ति तान् प्रति'भवान् योजनया कथं लाभं प्राप्तवान्, सहायता कथं प्राप्ता'इति एतत् सर्वं विज्ञापयतु।

राजेशप्रजापतिः - अवश्यं विज्ञापयिष्यामि महोदय!

प्रधानमन्त्रिवर्यः - अथ च तान् कथयतु यत् तेऽपि एतादृशं पत्रकं निर्मापयेयुः। यतः परिवारे कदा का समस्या आपतेत् इति वक्तुं न शक्यते। अधुना निर्धनः ओषधिभ्यः चिन्ताग्रस्तः भवेत् इति तु न उचितम् । इदानीं धनकारणेन सः ओषधिं न स्वीकुर्यात्, रोगस्य चिक्तित्सां न कारयेत्, तर्हि एष तु महच्चिन्तायाः विषयः। अथ निर्धनानां का कथा? भवान् अपि हृदयरोगेण ग्रस्तः आसीत्। तर्हि कतिपयमासान् यावत् कार्यं कर्तुम् अशक्तः स्यात्।

राजेशप्रजापतिः - अहं तु दशपदानि अपि चलितुम् असमर्थः आसम्। सोपानानाम् आरोहणाय अपि मम सामर्थ्यं न आसीत्, श्रीमन्!

प्रधानमन्त्रिवर्यः - तर्हि राजेशमहोदय! भवान् तु मम उत्तमसहयोगिरूपेण यावतः अपि निर्धनान् प्रति एतस्याः आयुष्मान्-भारतयोजनायाः सम्बन्धे अवबोधयितुं शक्नोति। तादृशानां रोगिणां सहायतां कर्तुं शक्नोति। अवलोकयतु, एतेन भवान् अपि सन्तुष्टः भविष्यति, अथ मम अपि प्रसन्नता भविष्यति यत् एकस्य राजेशस्य स्वास्थ्यं रक्षितम्। सः एव राजेश-महोदयः सहस्रशः जनानां स्वास्थ्यरक्षणं कारितवान् इति, एषा आयुष्मान्-भारतयोजना निर्धनिकेभ्यः अस्ति, मध्यमवर्गीयेभ्यः अस्ति, सामान्यपरिवारेभ्यः अस्ति, तर्हि भवान् गृहं गृहं प्रति एतां वार्तां प्रापयिष्यति?

राजेशप्रजापतिः - अवश्यं प्रापयिष्यामि, महोदय! अहं तु दिनत्रयं चिकित्सालये आसम्। श्रीमन्, तत्र अनेके दीनाः आगताः । तत्रैव अनेकेभ्यः एतस्याः योजनायाः सर्वाः सुविधाः उक्ताः, एतदपि अवबोधितवान्- यदि इदम् आयुष्मान्-पत्रकं भविष्यति, तर्हि सर्वं निःशुल्कं भविष्यति।

प्रधानमन्त्रिवर्यः - अस्तु राजेशवर्य! भवान् आत्मानं स्वस्थं स्थापयतु, कांचित् शरीरस्य चिन्तां करोतु, बालानां चिन्तां करोतु, अथ इतोऽपि प्रगतिं करोतु इति मदीयाः अनन्ताः शुभकामनाः सन्ति।

सखायः! वयं राजेशमहोदयस्य संवादं श्रुतवन्तः । आगच्छन्तु, अधुना अस्माभिः सह सुखदेवीवर्या संयुक्ता भवति। जानुसम्बद्धया समस्यया सा अत्यन्तं पीडाग्रस्ता आसीत्। आयान्तु, वयं सुखदेवीवर्यया प्रथमं तस्या दुःखवार्ता शृणुमः, अनन्तरं च सुखं कथम् आगतम् इति अवगमिष्यामः।

मोदिवर्यः - सुखदेवीवर्ये! नमस्ते! भवती कस्मात् स्थलात् वदति?

सुखदेवीवर्या - दानदपरा-स्थलात् |

मोदिवर्यः - कुत्र अस्ति एतत् स्थलम्?

सुखदेवीवर्या - मथुरायाम् |

मोदिवर्यः - मथुरायाम्, तर्हि सुखदेवीवर्ये! नमस्ते इत्यनेन सह भवत्या राधे-राधे इत्यपि कथनीयम् |

सुखदेवीवर्या - आम्। राधे! राधे!

मोदिवर्यः - अस्तु। भवत्याः महत्कष्टम् आसीत् इति श्रुतवान् । किञ्चन शल्यम् अपि जातम् | किञ्चित् विज्ञापयतु किं जातम् इति?

सुखदेवीवर्या - आम् । मम जानु नष्टम् आसीत्, तदर्थं प्रयागचिकित्सालये मम शल्यं जातम्।

मोदिवर्यः - भवत्याः वयः किम्?

सुखदेवीवर्या - चत्वारिंशत्वर्षाणि इति |

मोदिवर्यः - चत्वारिंशत्-वर्षाणि, अथ नाम सुखदेव पुनः च सुखदेवी रोगग्रस्ता ।

सुखदेवीवर्या - रोगः तु पञ्चदशे षोडशे वा वयसि एव जातः।

प्रधानमन्त्रिवर्यः - हन्त! एतावति लघु वयसि भवत्याः जानुनी नष्टे जाते ।

सुखदेवीवर्या - एतद् 'गठिया-बाय' इति नामभिः सन्धिवेदनारोगः वातरोगः वा उच्यते। तेन एव मम एषा समस्या जाता।

मोदीवर्यः - तर्हि वयसः षोडशतः चत्वारिंशत्तमवर्षपर्यन्तं भवत्या एतस्य चिकित्सा न कारिता।

सुखदेवीवर्या - नैव, कारिता आसीत् | पीडायै ओषधीः स्वीकृतवती, सामान्यचिकित्सकैः तु एषा एतादृशी ओषधिः, एषा तादृशी ओषधिः - इति एवं प्रकारेण प्रदताः। अयोग्यैः झोलकचिकित्सकैः ओषधस्वीकरणेन मम जानुनी नष्टे। किलोमीटर-एकं द्वयं वा पद्भ्यां गमने मयि एतत् महत्सङ्कटम् आपतितम्।

मोदिवर्यः - तर्हि सुखदेवीवर्ये! शल्यस्य विचारः कथम् आगतः? तदर्थं धनस्य किं प्रबंधनं कृतम्? कथम् एतत् अजायत?

सुखदेवीवर्या - अहं आयुष्मान्-पत्रकेण चिकित्सां कारितवती |

मोदिवर्यः - तर्हि किं भवत्यै आयुष्मान्-पत्रकं प्राप्तम् आसीत्?

सुखदेवीवर्या - आम्।

मोदिवर्यः - किम् आयुष्मान्-पत्रकेण निर्धनेभ्यः निःशुल्कम् उपचारः भवति- इति ज्ञायते स्म?

सुखदेवीवर्या - विद्यालये गोष्ठी भवति स्म । ततः मम पतिः ज्ञातवान्। सः मम नाम्ना पत्रकं निर्मितवान्।

मोदिवर्यः - आम्।

सुखदेवीवर्या - पुनः पत्रकेण उपचारः कारितः। न च किमपि धनं मया योजितम्। पत्रकेण एव मम उपचारः जातः। अत्यन्तं सम्यक् उपचारः सञ्जातः।

मोदिवर्यः - एवम्। पूर्वं यदि पत्रकं न भवति स्म तर्हि वैद्याः कियन्तं व्ययं सूचयन्ति स्म ?

सुखदेवीवर्या - सार्धद्विलक्षं, त्रिलक्षं वा रुप्यकाणि इति । षड्-सप्त-वर्षेभ्यः खट्वायाम् एव अस्मि। भगवन्तं प्रार्थये स्म यत् मां नय । मया नैव जीवनीयम्।

मोदिवर्यः - षड्-सप्त-वर्षेभ्यः खट्वायाम् आसीत्। हा हन्त!

सुखदेवीवर्या - आम् ।

मोदिवर्यः - अहो!

सुखदेवीवर्या - सर्वथा उत्थातुम्, उपवेष्टुं च न शक्नोमि।

मोदिवर्यः - अधुना तु भवत्याः जानुनी किं पूर्वतनापेक्षया समीचीने जाते स्तः?

सुखदेवीवर्या - अहं यथेष्टं भ्रमामि। सञ्चरामि। पाकशाला-सम्बद्धानि कार्याणि करोमि। गृहकार्याणि करोमि। बालेभ्यः भोजनं निर्माय ददामि।

मोदिवर्यः - तात्पर्यमिदमेव यत् आयुष्मान्-भारतस्य पत्रकं भवतीम् आयुष्मतीम् अकरोत्।

सुखदेवीवर्या - नैके धन्यवादाः। भवदीयायाः योजनायाः कारणेन अहं सम्यक् जाता। अहं स्वावलम्बिनी जाता।

मोदिवर्यः - अधुना तु बालाः अपि आनन्दिताः स्युः।

सुखदेवीवर्या - आम् । बालेभ्यः महत् कष्टं भवति स्म। माता कष्टे चेत् बालाः अपि कष्टम् अनुभवन्ति एव ।

मोदिवर्यः - अस्माकं जीवने सर्वाधिकं महत् सुखम् अस्माकं स्वास्थ्यमेव भवति । एतादृशं सुखयुतं जीवनं सर्वेऽपि प्राप्नुयुः, इयमेव आयुष्मत्भारतस्य भावना वर्तते । सुखदेवीवर्ये! पुनरेकवारं भवत्यै राधे राधे!

सुखदेवीवर्या - राधे राधे! नमस्ते ।

मम प्रियाः देशवासिनः, युवभिः समृद्धे प्रत्येकस्मिन् देशे त्रयः विषयाः अत्यन्तं महत्त्वम् आवहन्ति । ते एव विषयाः कदाचित् यूनां वास्तविकम् अभिज्ञानत्वेन भवन्ति । प्रथमः विषयः वर्तते -विशिष्टविचारः, नवाचारः च, द्वितीयः वर्तते - संकटसम्मुखीकरणप्रवृतिः, तृतीयः च वर्तते - सिसाधयिषा (can do Spirit)-इत्युक्ते अननुकूलपरिस्थितिष्वपि कार्यसाधनाय महती इच्छा । यदा एतत्-त्रयं सम्मिलति, तदा अभूतपूर्वाः, अद्भुताः वा परिणामाः भवन्ति । अद्यत्वे बहुधा श्रूयन्ते Start-Up, Start-Up, Start-Up इति, सत्यमिदम् । एतत्युगं नवकार्यारम्भस्य वर्तते । नवकार्यारम्भात्मके अस्मिन् युगे भारतं विश्वस्मिन् नेतृत्वं करोति । प्रतिवर्षं नवकार्यारम्भाय निवेशः कीर्तिमानत्वं भजते । क्षेत्रमिदं महता वेगेन प्रवर्धते । देशस्य लघुषु अपि नगरेषु नवकार्यारम्भः प्रवर्धते । अद्यत्वे यूनिकार्न(Unicorn) इत्येषः आङ्ग्लशब्दः चर्चायाम् अस्ति । एतत् तादृशः नवकार्यारम्भः वर्तते यस्य मूल्यनिर्धारणं (Valuation)-इति एक-बिलियन-डालर-मितं भवति इत्युक्ते प्रायशः सप्तसहस्रकोटि- रुप्यकाणामपेक्षया अधिकम् ।

सखायः! पञ्चदशाधिकद्विसहस्रतमे वर्षे केवलं नव, दश वा "Unicorns" इति भवन्ति स्म । भवन्तः अस्मिन् विषये विज्ञाय हर्षम् अनुभविष्यन्ति यत् Unicorns-सदृशे विश्वस्मिन् भारतं महत्या गत्या अग्रे सरति । कस्यचित् अभिलेखस्य आधारेण अस्मिन् वर्षे एव महत् किञ्चन परिवर्तनं जातम् । दशसु एव मासेसु भारते प्रत्येकं दशसु दिनेषु एकं Unicorn इति जातम् । एतदर्थमपि एषः महत्तमः विषयः वर्तते यत् अस्माकं युवानः एतत्साफल्यं कोरोणामहामारीसन्दर्भे अवाप्तवन्तः । अद्यावधि भारते सप्तत्यधिकाः Unicorns इति जाताः । इत्युक्ते सप्तत्यधिकाः नवकार्यारम्भाः एतादृशाः सन्ति येषां निर्धारणमूल्यम् एकबिलियनमितं ततोऽप्यधिकं वा अस्ति ।

सखायः! नवकार्यारम्भस्य साफल्यस्य कारणेन सर्वेषाम् अवधानम् अत्र विद्यते । अद्यत्वे येन प्रकारेण देशेभ्यः विदेशेभ्यः निवेशकेभ्यः च नवकार्यारम्भाय समर्थनं प्राप्यते । कतिपयेभ्यः वर्षेभ्यः पूर्वम् अस्य कल्पनाम् एव कोऽपि कर्तुं न पारयति स्म ।

सखायः, सद्यः उद्योगारम्भस्य माध्यमेन भारतीय-युवानः वैश्विक-समस्यानां समाधानाय अपि नैजं योगदानं प्रयच्छन्ति | अद्य वयं यूना मयूरपाटिलेन सम्भाषिष्या- महे, तेन स्वीयैः मित्रैः सम्भूय प्रदूषणस्य समस्यां समाधातुं प्रयतितम् -

मोदीजी - मयूर-महोदय! नमस्ते |

मयूरपाटिलः - नमस्ते, आदरणीय-महोदय!

मोदीजी - मयूर-महोदय! भवान् कथमस्ति?

मयूरपाटिलः - बाढं महोदय! | भवान् कथमस्ति?

मोदीजी - अहं बहु प्रसन्नः अस्मि | अस्तु, कथयतु यत् साम्प्रतं भवान् कस्मिन्श्चित् उद्योगारम्भे वर्तते?

मयूरपाटिलः - एवम्, महोदय!

मोदीजी - तथा च, Waste-इत्यवकरात् Best-इत्युत्कृष्टम् अपि कुर्वन्नस्ति |

मयूरपाटिलः - एवम्, महोदय!

मोदीजी - पर्यावरणस्य कृते अपि कुर्वन्नस्ति? मां किञ्चित् आत्मविवरणं कथयतु | निज-कार्यविषये सूचयतु, अथ च, अस्य कार्यस्य कृते भवान् विचारं कुतः अधिगतवान्?

मयूरपाटिलः - महोदय! यदा महाविद्यालये आसम्, तदा मम पार्श्वे Motorcycle-इति यन्त्रद्विचक्रिका आसीत् | यस्याः नियतान्तरं न्यूनतरम् आसीत्, आन्गारोत्सर्जनं च अधिकतरम् आसीत् | सा द्व्याघाति-यन्त्रद्विचक्रिका अवर्तत | तर्हि आङ्गारोत्सर्जनं न्यूनीकर्तुं नियतान्तरं च किञ्चित् विवर्धयितुम् अहं दश-एकादशवर्षाभ्यां प्राक् प्रयतितवान् | अपि च, प्रायेण प्रतिलिटर्-मित्या द्वि-षष्टि-किलोमीटरमितं नियतान्तरं वर्धितम् | ततः अहं प्रेरणाम् अवाप्नवं यत् किञ्चित् तादृशं वस्तु निर्मेयं यस्य बृहदुत्पादनं कर्तुं शक्येत, एवं कृते सति बहूनां जनानां लाभो भविष्यति, तर्हि वर्ष-चतुष्टय-पूर्वं वयं तदर्थं प्रविधिं विकासितवन्तः, Regional transport corporation-इति क्षेत्रीय-परिवहन-निगमे वयं दश-संख्याकेषु बस-यानेषु तं प्रविधिम् उपयुक्तवन्तः | तस्य प्रविधेः परिणामं वीक्षितुं वयं बसयानेषु प्रतिशतं प्रायेण चत्वारिंशत्-मित्या आङ्गारोत्सर्जनं न्यूनीकृतवन्तः |

मोदीजी - बाढम्! यः प्रविधिः भवता विकासितः, तस्य Patent-इति स्वत्वाधिकारादिकं कृतवान् वा?

मयूरपाटिलः - एवम्! स्वत्वाधिकारः सञ्जातः | वर्षेऽस्मिन् वयं स्वत्वाधिकारादिकम् अवाप्तवन्तः |

मोदीजी - अपि चाग्रे अस्य विवर्धनस्य भवतः कीदृशी योजनास्ति? | केन प्रकारेण कुर्वन्नस्ति? यथा बसयानानां परिणामः आगतः | तस्यापि सर्वविधं प्रकाशितं स्यात् | तर्हि अग्रे किं कर्तुं विचारयति भवान्?

मयूरपाटिलः - महोदय! 'Start-Up India'- इत्यन्तर्गतं नीत्यायोगतः 'Atal New India Challenge'- इत्यन्तर्गतं वयं अनुदानम् अवाप्तवन्तः, तदाधारेण च वयं साम्प्रतं निर्माणीं प्रवर्तितवन्तः, यत्र वयं Air filters-इति वायु-निस्यन्दकानि विनिर्मातुं शक्नुमः|

मोदीजी - तर्हि भारत-प्रशासन-पक्षतः कियत् अनुदानं भवान् अवाप्नोत्?

मयूरपाटिलः - नवति-लक्ष-रूप्यकमितम् |

मोदीजी - नवति-लक्ष-रूप्यकमितम्!

मयूरपाटिलः - एवम्!

मोदीजी - एवं हि भवतः कार्यं सुकरं जातम्?

मयूरपाटिलः - एवम्, साम्प्रतन्तु प्रवर्तते प्रक्रियान्तर्गतम् |

मोदीजी - भवन्तः कति मित्राणि सम्भूय एतत् सर्वं कुर्वन्ति?

मयूरपाटिलः - वयं चत्वारः स्मः, महोदय!

मोदीजी - तथा च चत्वारः अपि पूर्वं सहैव पठन्तः आसन्, ततः एव च भवान् अग्रेसर्तुं विचारम् अधिगतवान् |

मयूरपाटिलः - एवम्, एवम्! महोदय! वयं महाविद्यालये आस्मः | महाविद्यालये वयम् एतत् सर्वं विचारितवन्तः, तथा चायं मदीयः विचारः आसीत् यत् मदीयायाः यन्त्र-द्विचक्रिकायाः प्रदूषणं न्यूनतरं स्यात्, mileage-इति नियतान्तरं च विवर्धेत |

मोदीजी - बाढम्, प्रदूषणं न्यूनीकुर्वन्ति, mileage- इति नियतान्तरं च विवर्धयन्ति चेत् तदा प्रतिशतं व्ययः कियान् अवशिष्यते?

मयूरपाटिलः - महोदय! यन्त्र-द्विचक्रिकायाः परीक्षणं वयं विहितवन्तः, तस्याः नियतान्तरं प्रतिलिटर् पञ्चविंशति-किलोमीटरमित्या आसीत् तद् वर्धयित्वा ऊन-चत्वारिन्शत्किलोमीटरमितं विवर्धितवन्तः, एवं हि प्रायेण चतुर्दश-किलोमीटरमितो लाभः सञ्जातः, ततः प्रतिशतं चत्वारिन्शत्-मितं प्राङ्गारोत्सर्जनं व्यवकलितम् | यदा क्षेत्रीय-परिवहननिगमेन बसयानेषु एतत् परीक्षणं विहितम्, तर्हि तत्र प्रतिशतं दशमित्या इन्धन-क्षमता विवर्धिता, तत्रापि च प्रतिशतं पञ्च-त्रिंशत्-चत्वारिन्शत्किलो-मीटरमितं प्राङ्गारोत्सर्जनं न्यूनीभूतम् |

मोदीजी - मयूर! भवता साकं सञ्जात-सम्भाषणं मह्यम् अतितराम् अरोचत, मम पक्षतः भवतः सहकर्मिभ्यः अपि वर्धापनं सूचयतु यत् महाविद्यालयीय-जीवने या निज-समस्या आसीत्, तस्याः समाधानमपि भवद्भिः अन्विष्टम्, अथ च, तत्-समाधानेन यः मार्गः चितः, तेन पर्यावरणस्य समस्यायाः समाधानार्थमपि भवता उपक्रमितम् | तथा चैतत् अस्माकं देशस्य यूनामेवेदं सामर्थ्यं यत्ते किञ्चित् बृहत्तरमपि समाह्वानम् अभिस्वीकुर्वन्ति, तदर्थं मार्गान् अन्वेषयन्ति | मम पक्षतः भवतः कृते भूयस्यः शुभकामनाः | अनेकशो धन्यवादाः |

मयूरपाटिलः - धन्यवादं निवेदयामि, महोदय!

सखायः, कतिपय-वर्षेभ्यः प्राक् यदि कश्चन कथयति स्म यत् सः व्यापारं कर्तुं वाञ्छति आहोस्वित् कमपि नवीनं समवायम् प्रवर्तयितुम् इच्छति, तदा, परिवारस्य वरिष्ठानाम् उत्तरं भवति स्म यत्- "त्वं भृतिं कथं न कर्तुं वाञ्छसि, सेवाभृतिं करोतु ननु, भ्रात! अयि भो, सेवाभृतौ सुरक्षा भवति, वेतनं भवति | प्रपञ्चमपि न्यूनं भवति | परञ्च, अद्यत्वे यदि कश्चन स्वीयं समवायम् आरब्धुम् इच्छति चेत् तं परिवर्त्तिनो जनाः अतितराम् उत्साहिताः भवन्ति, तथा चात्र, तस्मै पूर्णं साहाय्यमपि कुर्वन्ति |

सखायः, भारतस्य वृद्धिकथायाः अयं संक्रान्ति-कालः, यत्र जनाः साम्प्रतं केवलं वृत्यन्वेषकाः भवितुमेव नैव स्वप्नायन्ते परञ्च वृत्ति-सर्जकाः अपि जायन्ते | एवं हि विश्वमञ्चोपरि भारतस्य स्थितिः इतःपरमपि दृढतरा भविता |

मम प्रियाः देशवासिनः, अद्य वयं 'मनकीबात'-प्रसारणे अमृतमहोत्सवं चर्चितवन्तः | अमृतकाले अस्मदीयाः देशवासिनः नवान् नवीनतमान् च संकल्पान् केन प्रकारेण पूर्णतां नयन्ति - एतदपि चर्चितम्, युगपदेव, डिसेम्बर-मासे सेनानां शौर्येण सम्बद्धान् अवसरान् अपि अवगतवन्तः | डिसेम्बर-मासे एव अपरमेकं महत्त्वाधायि दिनमायाति यस्मात् वयं प्रेरणाम् आदद्मः | दिनमिदं डिसेम्बर-मासे षष्ठे दिनाङ्के समायाति यदा बाबासाहब-अम्बेडकरस्य पुण्यतिथिः भवति | बाबासाहबस्य स्वीयं पूर्णमपि जीवनं देशस्य समाजस्य च कृते निज-कर्तव्यानां निर्वहणाय समर्पितमासीत् | वयं देशवासिनः न कदापि एतत् विस्मरेम - अस्मदीयस्य संविधानस्य अपि मूलभावनाम्, अस्माकं संविधानम् अस्मभ्यः सर्वेभ्यः देशवासिभ्यः स्व-स्व-कर्तव्यानां निर्वहणम् अपेक्षते - तर्हि आयान्तु, वयमपि संकल्पयामः यत् अमृतमहोत्सवे वयं कर्तव्यानि पूर्णनिष्ठया निभालयिष्यामः | अयमेव बाबासाहबस्य कृते अस्मदीयः यथार्थः श्रद्धांजलिः भविता |

सखायः, अधुना वयं डिसेम्बर-मासं प्रविशामः, स्वाभाविकमिदं यत् आगामि-'मनकीबात'-प्रसारणम् एतद्वर्षस्य अन्तिमं प्रसारणं भविता | द्वाविंशत्युत्तर-द्विसहस्रतमे वर्षे पुनः यात्राम् आरप्स्यामहे, अस्तु, भवद्भ्यः विविधान् परामर्शान् अपेक्षे एव, अपेक्षिष्ये च | भवन्तः अस्मै वर्षाय किंप्रकारकं सौप्रस्थानिकं व्याहरन्ति, नवीने वर्षे च किं किं च क्रियमाणाः भविष्यन्ति

- एतदपि अवश्यं सूचयन्तु, अथ चेदमपि न कदापि विस्मर्तव्यं यत् 'कोरोना' नाधुनावधि प्रयातः | सावधानं व्यवहर्तव्यम् - इत्यस्ति अस्माकं सर्वेषां दायित्वम् | कोटिशो धन्यवादाः!

*****

[भाषान्तरम् - सर्वश्री-श्रुतिकान्तपाण्डेय-गवीशद्विवेदिभ्यां सम्भूय बलदेवानन्द-सागर-द्वारा]

अणुप्रैषः - baldevanand.sagar@gmail.com